श्रीगणेशाय नमः ॥ अथ रामहृदयं लिख्यते ॥ श्रीसीतामनोहरज
तु ॥ कैलासाग्रे कदाचिद्रविशतविमले मंदिरे रत्नपीठे संवि
ष्टं ध्याननिष्टं त्रिनयनमभयं सेवितं सिद्धसंघै । देवी वामांक
संस्था गिरिवरतनया पार्वती भक्तिनम्रा प्राहेदं देवमीशं स
कलहितकरं वाक्यमानंदकंदं ॥ १ ॥ पार्वत्युवाच ॥ नमोस्तु ते दे
व जगन्निवास सर्वात्मदृक् त्वं परमेश्वरोसि ॥ पृच्छामि तत्वं
पुरुषोत्तमस्य सनातनं त्वं च सनातनोसि ॥ २ ॥ गोप्यं यदत्यं
तमनन्यवाच्यं वदंति भक्तेषु महानुभावाः ॥ तदप्यहोहं तव
देवभक्ता प्रियोसि मे त्वं वद यत्तु पृष्टं ॥ ३ ॥ ज्ञानं सविज्ञानम
थानुभक्तिवैराग्ययुक्तं च मितं विभास्वत ॥ जानाम्यहं योषि
दपि त्वदुक्तं यथा तथा ब्रूहि तरंति येन ॥ ४ ॥ पृच्छामि चान्यं
च परं रहस्यं तदेव चाग्रे वद वारिजाक्ष ॥ श्रीरामचंद्राखि

राम०
१

त तत्वसारंभक्तिहीनानैवयांतिप्रसिद्धा ॥ ५ ॥ भक्तिप्रसिद्धांभ
वमोक्षणायनान्यत्ततःसाधनमास्तिकिंचित् ॥ तथापिहृत्सं
शयबंधनंमेविभेत्तुमर्हस्यमलोक्तिभिस्त्वं ॥ ६ ॥ वदंतिरामंप
रमेकमाद्यंनिरस्तमायागुणसंप्रवाहं ॥ भजंतिचाहर्निशमम
प्रमत्ताःपरंपदंयांतिपथैवसिद्धाः ॥ ७ ॥ वदंतिकेचित्परमो
पिरामःस्वाविद्ययासंवृतमात्मसंज्ञं ॥ जानातिनात्मानम
तःपरेणसंबोधितोवेदपरात्मतत्वं ॥ ८ ॥ यदिस्मजानाति
कुतोविलापःसीताकृतेतेनकृतःपरेण ॥ जानातिनैवंयदि
केनसेव्यःसमोहिसर्वैरपिजीवजातैः ॥ ९ ॥ अत्रोत्तरंकिंवि
दितंभवद्भिस्तद्ब्रूहिमेसंशयभेदिवाक्यं ॥ १० ॥ श्रीमहेश्वर
उवाच ॥ धन्यासिभक्तासिपरात्मनस्त्वंयत्ज्ञातुमिछाबत
वराम तत्वं ॥ पुरानकेनाप्यभिचोदितोहंवक्तुंरहस्यंपरमंनि

हृद०

नसेते

छ्रं

शिव
१

गूढं ॥ ११ ॥ त्वयाद्यभक्त्यापरितोषितोहंवक्ष्येनमस्कृत्यरघूत्तमं
ते ॥ रामंपरात्माप्रकृतेरनादिरानंदएकः पुरुषोत्तमोहि ॥ १२ ॥
स्वमाययाकृत्स्नमिदंहिसृष्ट्वानभोवदंतर्बहिरास्थितोयः ॥ १२ ॥
सर्वांतरस्थोपिनिगूढआत्मास्वमाययासृष्टमिदंविचित्रं
जगंतिनित्यंपरितोभ्रमंतियत्संनिधौचुंबकलोहवद्धि ॥ १३ ॥
एवंनजानंतिविमूढचित्ताःस्वाविद्ययासंवृतमानसाये
स्वाज्ञानमप्यात्मविशुद्धबोधेध्यारोपयंतीहनिरस्तमाये
॥ १४ ॥ संसारमेवानुसरंतितेवैपुत्रादिसक्ताःपुरुकर्मयु
क्ताः ॥ जानंतिनैवंहृदयास्थितंवैचामीकरंकंठगतंयथाज्ञाः
॥ १५ ॥ यथाप्रकाशोननुविद्यतेरवौज्योतिःस्वभावेपरमेश्व
रेतथा ॥ विशुद्धविज्ञानघनेरघूत्तमेविद्याकथंस्यात्परतः
परात्मनि ॥ १६ ॥ यथैवचाक्ष्णोर्भ्रमतेग्रहादिकंविनष्टदृष्टे

राम०
२

भ्रमतीवदृश्यते ॥ तथैवदेहेंद्रियकर्तुरात्मनः कृतंपरेध्यस्यज
नोविमुह्यति ॥ १७ नहीनरात्रिःसवितुर्यथाभवेत्प्रकाशरूपा
व्यभिचारतःक्वचित ॥ ज्ञानंतथाज्ञानमिदंद्वयंहरेरामेक
थंस्थास्यतिशुद्धचिद्घने १८ तस्मात्परानंदमयेरघूत्त
मेविज्ञानरूपेहिनैविद्यतेतमः ॥ अज्ञानसाक्षिण्यरविंद
लोचनेमायाश्रयत्वान्नहिमोहकारणं ॥ १९ ॥ श्रीमहादेवउ
वाच ॥ अत्रतेकथयिष्यामीरहस्यमपिदुर्लभं ॥ सीताराम
मरुत्सूनुसंवादंमोक्षसाधनं ॥ २० पुरारामायणेरामोरा
वणंदेवकंटकं ॥ हत्वारणेरणश्लाघीसपुत्रबलवाहनं ॥ २१
सीतयासहसुग्रीवलक्ष्मणाभ्यांसमन्वितः । अयोध्याम
गमद्रामोहनुमत्प्रमुखैर्वृतः ॥ २२ अभिषिक्तःपरिवृतो
वसिष्ठाद्यैर्महात्मभिः ॥ सिंहासनेसमासीनःकोटिसूर्यस

हृद०

शिव
२

मप्रभः॥२३॥ दृष्ट्वा तदा हनुमंतंप्रांजलिपुरतःस्थितं॥ कृतार्था
र्थंनिजकार्येणज्ञानापेक्षंमहामतिं॥२४॥ रामःसीतामुवाचेदंब्रू
हितत्वंहनुमते॥ निःकल्मषोयंज्ञानस्यपात्रंनौनित्यभक्ति
मान्॥२५॥ तथेतिजानकीप्राहतत्वंरामस्यनिश्चितं॥ हनुम
तेप्रपन्नायसीतालोकविमोहिनी॥२६॥ सीताउवाच॥ रामं
विद्धिपरंब्रह्मसच्चिदानंदमद्वयं॥ सर्वोपाधिविनिर्मुक्तंसत्ता
मात्रमगोचरं॥२७॥ आनंदंनिर्मलंशांतंनिर्विकारंनिरंजनं॥
सर्वव्यापिनमात्मानंस्वप्रकाशमकल्मषं॥२८॥ मांविद्धिमू
लप्रकृतिंसर्गस्थित्यंतकारिणीं॥ तस्यसांनिधिमात्रेणसृ
जामीदमतंद्रिता॥२९॥ तत्सांनिध्यान्मयासृष्टंतस्मिन्ना
रोप्यतेबुधैः॥ अयोध्यानगरेजन्मरघुवंशेतिनिर्मले॥३०॥
विश्वामित्रसहायत्वंमखसंरक्षणंततः॥ अहल्याशाप

राम०
३

रामनंचापभंगोमहेशितुः ॥ ३१ ॥ मत्पाणिग्रहणंपश्चाद्भार्ग
वस्यमदक्षयः ॥ अयोध्यानगरेवासोमयाद्वादशवार्षिकः ॥ ३२ ॥
दंडकारण्यगमनंविराधवधएवच ॥ मायामारीचमरणंमा
यासीताहृतिस्तथा ॥ ३३ ॥ जटायुषोमोक्षलाभः कबंधस्यत
थैवच ॥ शबर्यापूजनंपश्चात्सुग्रीवेणसमागमः ॥ ३४ ॥ वा
लिनश्चवधः पश्चात्सीतान्वेषणमेवच ॥ सेतुबंधश्चजल
धौलंकायांश्चनिरोधनं ॥ ३५ ॥ रावणस्यवधोयुद्धेसपुत्र
स्यदुरात्मनः ॥ विभिषणेराज्यदानंपुष्पकेनमयासह ॥ ३६ ॥
अयोध्यागमनंपश्चाद्राज्येरामाभिषेचनं ॥ एवमादीनिक
र्माणिमयैवाचरितान्यपि ॥ ३७ ॥ आरोपयंतिरामेऽस्मिन्नि
र्विकारेखिलात्मनि ॥ ३८ ॥ रामोनगच्छतिनतिष्ठतिनानु
शोचत्याकांक्षतेत्यजतिनोनकरोतिकिंचित् ॥ आनंदमूर्ति

हृद०

शिव
३

स्वच्छः परिणामहीनो मायागुणाननुगतो हि तथा विभाति ३९ ॥
श्रीमहेश्वर उवाच ॥ ततो रामः स्वयं प्राह हनुमंतमुपास्थितं
श्रुणु तत्वं प्रवक्ष्यामि ह्यात्मानात्मपरात्मनां ॥ ४० ॥ आकाश
स्य यथा भेदस्त्रिविधो दृश्यते महान् । जलाशये महाकाशस्त
दवछिन्न एव हि ॥ ४१ ॥ प्रतिबिंबाख्यमपरं दृश्यते त्रिविधं
नभः ॥ बुध्यवछिन्नचैतन्यमेकं पूर्णं तथापरं ॥ ४२ ॥ आभास
स्त्वपरं बिंबभूतमेवं त्रिधा चितिः ॥ आभासबुद्धेः कर्तृत्वम
विछिन्नेविकारिणि ॥ ४३ ॥ साक्षीण्यारोप्यते भ्रांत्या जीवत्वं
च तथाबुधैः ॥ आभासस्तु मृषा बुद्धिरविद्याकार्यमुच्यते
॥ ४४ ॥ अविछिन्नं तु तद्ब्रह्म विछेदस्तु विकल्पितः ॥ अवछि
न्नस्य पूर्णेन एकत्वं प्रतिपाद्यते ॥ ४५ ॥ तत्वमस्यादिवाक्यै
श्चनाभासस्याहमस्तथा ॥ ऐक्यज्ञानं यदोत्पन्नं महावा

राम०
४

क्येनच्चात्मनः ॥४६॥ तदाविद्यास्वकार्यैश्चनश्यत्येवनसं
शयः ॥ एतत्विज्ञायमद्भक्तोमद्भावायोपपद्यते ॥४७॥ म
द्भक्तिविमुखानांचशास्त्रगर्तेषुमुह्यतां ॥ नज्ञानंनचमो
क्षस्यात्तेषांजन्मशतैरपि ॥४८॥ इदंरहस्यंहृदयंममात्म
नोमयैवसाक्षात्कथितंतवानघ ॥ मद्भक्तिहीनायशठाय
नत्वयादातव्यमैंद्राद्यपिराज्यताधिकं ॥४९॥ श्रीमहादेव
उवाच ॥ एतत्तेभिहितंदेवीश्रीरामहृदयंमया ॥ अतिगु
ह्यतमंहृद्यंपवित्रंपापशोधनं ॥५०॥ साक्षाद्रामेणकथि
तंसर्ववेदांतसंग्रहं ॥ यःपठेत्सततंभक्त्यासमुक्तोनात्रसं
शयः ॥५१॥ ब्रह्महत्यादिपापानिबहुजन्मार्जितान्यपि ॥ न
श्यंत्येवनसंदेहोरामस्यवचनंयथा ॥५२॥ जातिभ्रष्टोतिपा
पीपरधनपरदारेषुसक्तोयदिस्यात्स्तेयीब्रह्मघ्नमातापि

हृ०

शिव
६

त्वधानिरतोयोगिवृंदापकारी ॥ यः संपूज्याभिरामंपठ
ति-च हृदयं रामचंद्रस्यभक्त्यायोगींद्रैरप्यलभ्यंपदमपिल
भते सर्वदेवैप्रपूज्यः ॥ ५३ ॥ श्रीब्रह्मोवाच ॥ श्रीरामहृदयं
यस्तुहनुमत्प्रतिमांतिके ॥ त्रिपठेत्प्रत्यहंमोनीससर्वाप्सि
तभाग्भवेत् ॥ ५४ ॥ पठन्श्रीरामहृदयंतुलस्यश्वत्थयो
र्यदि ॥ प्रदक्षिणंप्रकुर्वतिब्रह्महत्यानिवर्तते ॥ ५५ ॥ इति
श्रीब्रह्मांडपुराणेउत्तरखंडेउमामाहेश्वरसंवादे रामहृद
यसंपुर्णशुभं संत १८९१ मितिभाद्रपद वद्य दसम्यायां
भृगुवासरे त-दीनेसमाप्तं हस्ताक्षरा विष्णुराममीसर ॥